## ॐ श्रीपरमात्मने नमः। अथ प्रथमोऽध्यायः। अर्जुनविषादयोगः।

| | |
|---|---|
| धृतराष्ट्र उवाच<br>धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः।<br>मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय॥ १॥ | अयनेषु च सर्वेषु यथाभागमवस्थिताः।<br>भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एव हि॥ ११॥ |
| सञ्जय उवाच<br>दृष्ट्वा तु पाण्डवानीकम् व्यूढं दुर्योधनस्तदा।<br>आचार्यमुपसङ्गम्य राजा वचनमब्रवीत्॥ २॥ | तस्य सञ्जनयन्हर्षम् कुरुवृद्धः पितामहः।<br>सिंहनादं विनद्योच्चैः शङ्खं दध्मौ प्रतापवान्॥ १२॥ |
| पश्यैतां पाण्डुपुत्राणाम् आचार्य महतीं चमूम्।<br>व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता॥ ३॥ | ततः शङ्खाश्च भेर्यश्च पणवानकगोमुखाः।<br>सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत्॥ १३॥ |
| अत्र शूरा महेष्वासाः भीमार्जुनसमा युधि।<br>युयुधानो विराटश्च द्रुपदश्च महारथः॥ ४॥ | ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ।<br>माधवः पाण्डवश्चैव दिव्यौ शङ्खौ प्रदध्मतुः॥ १४॥ |
| धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान्।<br>पुरुजित्कुन्तिभोजश्च शैब्यश्च नरपुङ्गवः॥ ५॥ | पाञ्चजन्यं हृषीकेशः देवदत्तं धनञ्जयः।<br>पौण्ड्रं दध्मौ महाशङ्खम् भीमकर्मा वृकोदरः॥ १५॥ |
| युधामन्युश्च विक्रान्तः उत्तमौजाश्च वीर्यवान्।<br>सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः॥ ६॥ | अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः।<br>नकुलः सहदेवश्च सुघोषमणिपुष्पकौ॥ १६॥ |
| अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम।<br>नायका मम सैन्यस्य सञ्ज्ञार्थं तान्ब्रवीमि ते॥ ७॥ | काश्यश्च परमेष्वासः शिखण्डी च महारथः।<br>धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः॥ १७॥ |
| भवान्भीष्मश्च कर्णश्च कृपश्च समितिञ्जयः।<br>अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च॥ ८॥ | द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते।<br>सौभद्रश्च महाबाहुः शङ्खान्दध्मुः पृथक्पृथक्॥ १८॥ |
| अन्ये च बहवः शूराः मदर्थे त्यक्तजीविताः।<br>नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः॥ ९॥ | स घोषो धार्तराष्ट्राणाम् हृदयानि व्यदारयत्।<br>नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन्॥ १९॥ |
| अपर्याप्तं तदस्माकम् बलं भीष्माभिरक्षितम्।<br>पर्याप्तं त्विदमेतेषाम् बलं भीमाभिरक्षितम्॥ १०॥ | अथ व्यवस्थितान्दृष्ट्वा धार्तराष्ट्रान्कपिध्वजः।<br>प्रवृत्ते शस्त्रसम्पाते धनुरुद्यम्य पाण्डवः॥ २०॥ |

| | |
|---|---|
| हृषीकेशं तदा वाक्यम् इदमाह महीपते।<br>अर्जुन उवाच<br>सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत॥ २१॥ | निमित्तानि च पश्यामि विपरीतानि केशव।<br>न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे॥ ३१॥ |
| यावदेतान्निरीक्षेऽहम् योद्धुकामानवस्थितान्।<br>कैर्मया सह योद्धव्यम् अस्मिन् रणसमुद्यमे॥ २२॥ | न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च।<br>किं नो राज्येन गोविन्द किं भोगैर्जीवितेन वा॥ ३२॥ |
| योत्स्यमानानवेक्षेऽहम् य एतेऽत्र समागताः।<br>धार्तराष्ट्रस्य दुर्बुद्धेः युद्धे प्रियचिकीर्षवः॥ २३॥ | येषामर्थे काङ्क्षितं नः राज्यं भोगाः सुखानि च।<br>त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च॥ ३३॥ |
| सञ्जय उवाच<br>एवमुक्तो हृषीकेशः गुडाकेशेन भारत।<br>सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम्॥ २४॥ | आचार्याः पितरः पुत्राः तथैव च पितामहाः।<br>मातुलाः श्वशुराः पौत्राः श्यालाः सम्बन्धिनस्तथा॥ ३४॥ |
| भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम्।<br>उवाच पार्थ पश्यैतान् समवेतान्कुरूनिति॥ २५॥ | एतान्न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन।<br>अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते॥ ३५॥ |
| तत्रापश्यत्स्थितान्पार्थः पितॄनथ पितामहान्।<br>आचार्यान्मातुलान्भ्रातॄन् पुत्रान्पौत्रान्सखींस्तथा॥ २६॥ | निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन।<br>पापमेवाश्रयेदस्मान् हत्वैतानाततायिनः॥ ३६॥ |
| श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि।<br>तान्समीक्ष्य स कौन्तेयः सर्वान्बन्धूनवस्थितान्॥ २७॥ | तस्मान्नार्हा वयं हन्तुम् धार्तराष्ट्रान्स्वबान्धवान्।<br>स्वजनं हि कथं हत्वा सुखिनः स्याम माधव॥ ३७॥ |
| कृपया परयाविष्टः विषीदन्निदमब्रवीत्।<br>अर्जुन उवाच<br>दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम्॥ २८॥ | यद्यप्येते न पश्यन्ति लोभोपहतचेतसः।<br>कुलक्षयकृतं दोषम् मित्रद्रोहे च पातकम्॥ ३८॥ |
| सीदन्ति मम गात्राणि मुखं च परिशुष्यति।<br>वेपथुश्च शरीरे मे रोमहर्षश्च जायते॥ २९॥ | कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम्।<br>कुलक्षयकृतं दोषम् प्रपश्यद्भिर्जनार्दन॥ ३९॥ |
| गाण्डीवं स्रंसते हस्तात् त्वक्चैव परिदह्यते।<br>न च शक्नोम्यवस्थातुम् भ्रमतीव च मे मनः॥ ३०॥ | कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः।<br>धर्मे नष्टे कुलं कृत्स्नम् अधर्मोऽभिभवत्युत॥ ४०॥ |

| | |
|---|---|
| अधर्माभिभवात्कृष्ण प्रदुष्यन्ति कुलस्त्रियः।<br>स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसङ्करः॥४१॥ | अहो बत महत्पापम् कर्तुं व्यवसिता वयम्।<br>यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः॥४५॥ |
| सङ्करो नरकायैव कुलघ्नानां कुलस्य च।<br>पतन्ति पितरो ह्येषाम् लुप्तपिण्डोदकक्रियाः॥४२॥ | यदि मामप्रतीकारम् अशस्त्रं शस्त्रपाणयः।<br>धार्तराष्ट्रा रणे हन्युः तन्मे क्षेमतरं भवेत्॥४६॥ |
| दोषैरेतैः कुलघ्नानाम् वर्णसङ्करकारकैः।<br>उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः॥४३॥ | सञ्जय उवाच<br>एवमुक्त्वार्जुनः सङ्ख्ये रथोपस्थ उपाविशत्।<br>विसृज्य सशरं चापम् शोकसंविग्नमानसः॥४७॥ |
| उत्सन्नकुलधर्माणाम् मनुष्याणां जनार्दन।<br>नरकेऽनियतं वासः भवतीत्यनुशुश्रुम॥४४॥ | |

ॐ तत् सत्।

इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे

अर्जुनविषादयोगो नाम प्रथमोऽध्यायः।

श्रीकृष्णार्पणमस्तु॥